শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীকৃষ্ণকৱি ৱিরচিতং

॥ শ্রীরঘুৱীরসুপ্রভাতম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রীরঘুৱীরসুপ্রভাতম্ ॥

পরিণতিপরিশংসী মন্দমন্দং নিশাযা
মৃদুমধুরনিনাদো জৃম্ভতেঽযং মৃদঙ্গাৎ।
করতলপরিমৃষ্টাদ্ বন্দিনামাগতানাং
রঘুকুলজলধীন্দো নাথ তে সুপ্রভাতম্॥ **1**॥

মুহুরৱিকলগীতৈর্মোহযন্নিন্দ্রিযৌঘং
শ্রুতিপুটৱিৱরাভ্যাং মন্দমন্তঃ প্রৱিশ্য।
অযমপহরতি দ্রাঙ্মানসং ৱেণুনাদো
রঘুকুলজলধীন্দো নাথ তে সুপ্রভাতম্॥ **2**॥

উদযতি নিশি যস্মিন্ সদ্গণো ধিক্কৃতোঽভূৎ
স তু পতনমুপৈষ্যত্যুন্নতিং ধিগ্ ধিগিন্দোঃ।
প্রভৱতি হি ৱিভূত্যৈ সদ্গণস্যোন্নতিস্তে
রঘুকুলজলধীন্দো নাথ তে সুপ্রভাতম্॥ **3**॥

অযমুদযতি গূঢঃ কিঞ্চিদুচ্চৈঃ সরিদ্ভিঃ
শ্রযতি সপদি ভাস্বানংশুজালৈঃ পরীতঃ।
হরিহরিদসিতাক্ষ্যাঃ কঙ্কতাভাং করাব্জে
রঘুকুলজলধীন্দো নাথ তে সুপ্রভাতম্॥ **4**॥

দশশতকরজালং দ্রাক্ প্রসার্যংশুমালি -
ন্যমরদিগসিতাক্ষ্যাশ্লেষণাযোন্মুখেঽস্মিন্।
কলমিহ রচযন্তে গীতমেতা ৱিহঙ্গ্যো
রঘুকুলজলধীন্দো নাথ তে সুপ্রভাতম্॥ **5**॥

বিকচজলজগন্ধানাহরন্ মন্দবাত -
শ্চিরময়মবগাহ্য স্রোতসি হ্লাদিনীনাম্।
শময়তি তব দেব্যাঃ স্বেদবিন্দূন্ মুখাব্জে
রঘুকুলজলধীন্দো নাথ তে সুপ্রভাতম্॥ **6**॥

জনকনৃপতিকন্যা পূর্বমেব প্রবুদ্ধা
কথমপি বিরচয্যাশ্লেষভেদং তবৈষা।
রচয়তি ননু দূরে ক্লেশমাবীজনাৎ তে
রঘুকুলজলধীন্দো নাথ তে সুপ্রভাতম্॥ **7**॥

তব চরণসরোজদ্বন্দ্বসংবাহনেন
হ্যযমপি গময়িৎবা শর্বরীং নির্নিমেষম্।
অরুণনয়নকোণঃ প্রাঞ্জলির্বায়ুসূনূ
রঘুকুলজলধীন্দো নাথ তে সুপ্রভাতম্॥ **8**॥

কমপি কুলিশপাণেরায়ুধেনাপ্যভেদ্যং
রচয়সি যদি সেতুং দেব সংসারসিন্ধোঃ।
তরতি সুখমিদানীং সর্ব এবাত্র লোকে
রঘুকুলজলধীন্দো নাথ তে সুপ্রভাতম্॥ **9**॥

॥ ইতি শ্রীরঘুবীরসুপ্রভাতং সমাপ্তম্॥